Roll No...........................
Signature of Invigilator .........

Paper Code
BSV-C1-101

# पतंजलि विश्वविद्यालय

## University of Patanjali
## Examination December - 2022

**बी. ए. व्याकरण (Honours), प्रथमसत्रम्**
**व्याकरणम्, प्रथमपत्रम्**
**संस्कृतव्याकरणम् - 1**

समयः - होरात्रयम् पूर्णाङ्काः ७०

---

निर्देशः अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति, अङ्कनिर्देशः प्रतिखण्डं द्रष्टव्यः, सर्वे प्रश्नाः समाधेयाः।

( खण्ड -क )

( काशिकातः )

१. पृष्टेषु पञ्चसु सूत्रेषु त्रयाणां काशिकारीत्या व्याख्यानम्। ( 5 x3 =15 )

1. ऋलृक्।
2. इको गुणवृद्धी।
3. न बहुव्रीहौ।
4. प्रत्ययलोपे प्रत्ययलक्षणम्।
5. अणुदित् सवर्णस्य चाप्रत्ययः।

२. पृष्टेषु सप्तसु सूत्रेषु पञ्चानां पदकृत्यम्। ( 3 x5 =15 )

1. हलोऽनन्तरा संयोगः।
2. आद्यन्तवदेकस्मिन्।
3. एच इग्घ्रस्वादेशे।
4. स्थानिवदादेशोऽनल्विधौ।
5. द्विर्वचनेऽचि।
6. न लुमताङ्गस्य।
7. वृद्धिर्यस्याचामादिस्तद् वृद्धम्।

३. पृष्टेषु सप्तसु वार्तिकेषु पञ्चानां व्याख्यानम्। ( 3 x5 =15 )

1. विभाषाप्रकरणे तीयस्य वा ङित्सु सर्वनाम संज्ञा इत्युपसंख्यानम्।
2. मृजेरन्त्यात्पूर्वंनुमिच्छन्ति अनुषङ्गसंयोगादिलोपार्थम्।
3. स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवद् भवति।
4. सित्तद्विशेषाणां वृक्षाद्यर्थम्।
5. समासप्रत्ययविधौ तदन्तविधेः प्रतिषेधः वक्तव्यः।
6. वा नामधेयस्य वृद्धसंज्ञावक्तव्या।
7. ऋकारलृकारयोः सवर्णसंज्ञा वक्तव्या।

४. प्रदत्तासु तिसृषु कारिकासु द्वयोर्व्याख्यानम्। ( 5 x2 =10 )

1. ईषदर्थेक्रियायोगेमर्यादाभिविधौ च यः।

   एतमातं ङितं विद्याद् वाक्यस्मरणयोरङित्॥

2. प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न।

   आचारादप्रधानत्वाल्लोपश्च बलवत्तरः॥

3. प्रागुदञ्चौ विभजते हंसः क्षीरोदकं यथा।

   विदुषां शब्द सिद्ध्यर्थं सा न पातु शरावती॥

५. प्रदत्तेषु पञ्चसु शब्देषु/शङ्कासु त्रयाणां सिद्धिः/समाधानम्। ( 5 x3 =15 )

1. शिण्ढि।
2. "बहुखट्वकः"।
3. 'हल्' इत्यत्र किमर्थमुपदिष्टोऽपि हकारः पुनरुपदिश्यते?
4. 'स्थानेऽन्तरतमः' इत्यत्र स्थाने इति वर्तमाने पुनः स्थानेग्रहणं किम्?
5. 'गवित्ययमाह' इत्यत्र गो शब्दाद् विभक्तेरुत्पत्ति कस्मान्न भवति।

---------------x---------------